Sources of Indo-Aryan Lexicography

NĀMAMĀLIKĀ OF BHOJA

CRITICALLY EDITED BY
EKANATH DATTATREYA KULKARNI
AND
VASUDEO DAMODAR GOKHALE

POONA

1955

DECCAN COLLEGE MONOGRAPH SERIES

1. *Panipat 1761*—by T. S. Shejwalkar. Crown 4to, pp. 141 and 9 maps. 1946. Rs. 12/-. [**M. 1**].
2. *Anthropometric Measurements of the Marathas*—by Iravati Karve. Crown 4to, pp. 71 and 4 plates. 1948. Rs. 8/-. [**M. 7**].
3. *Studies in the Historical and Cultural Geography and Ethnography of Gujarat*—by H. D. Sankalia (being the Thakkar Vassonji Madhavji Lectures for 1944 at the University of Bombay). Crown 4to, pp. xvi + 245 and 3 maps. 1949. Rs. 15/-. [**M. 11**].
4. *Etched Beads in India*—by M. G. Dikshit. Crown 4to, pp. viii + 79 and 19 plates. 1949. Rs. 10/-. [**M. 13**].
5. *Report of the Excavations at Brahmapuri* (*in Kolhapur*)—by H. D. Sankalia and M. G. Dikshit. Crown 4to, pp. xvi + 154 + 37 plates. 1952. Rs. 30/-. [**M. 15**].
6. *Stone Age and Pleistocene Chronology in Gujarat*—by. F. E. Zeuner. Crown 4to, pp. 46 + 11 plates. 1950. Rs. 8/-. [**M. 17**].
7. *Phonemics of Old Tamil*—by C. R. Sankaran. Crown 4to, pp. vi + 71 + 2 plates. 1951. Rs. 8/-. [**M. 18**].
8. *Anthropometric Measurements of Maharashtra*—by I. Karve and V. M. Dandekar. Crown 4to, pp. vi + 134 + 2 maps + 24 plates, 1951. Rs. 12/-. [**M. 20**].
9. *Nagpur Affairs* (*Selections from the Menavali Daftar*)—by T. S. Shejwalkar. Royal 8vo, pp. lv + 450. 1954. Rs. 15/-. [**M. 25**].
10. *Godavari Palaeolithic Industry*—by H. D. Sankalia. Demi 4to, pp. ii + 59 + 49 figures. 1952. Rs. 12/-. [**M. 28**].
11. *Kinship Organisation in India*—by Iravati Karve. Crown 4to, pp. x + 304. 1953. Rs. 15/-. [**M. 41**].
12. *High-School Students in Poona*—by I. P. Desai. Crown 4to, pp. x + 123. 1953. Rs. 10/-. [**M. 44**].
13. *Excavation at Nasik and Jorwe*—by H. D. Sankalia and S. B. Deo. Crown 4to, pp. xv + 177 + 135 plates and 94 drawings. 1954. Rs. 45/-. [**M. 45**].

DECCAN COLLEGE DISSERTATION SERIES

1. *Historical Grammar of Old Kannaḍa*—(based entirely on the Kannaḍa Inscriptions of the 8th, 9th and 10th centuries A.D.)—by G. S. Gai. Royal 8vo, pp. xvi + 232. 1946. Rs. 15/-. [**D. 2**].
2. *Cultural History from Vāyu Purāṇa*—by D. R. Patil. Royal 8vo, pp. xviii + 348. 1946. Rs. 15/-. [**D. 3**].
3. *Historical Grammar of Inscriptional Prakrits*—by M. A. Mehendale. Royal 8vo, pp. xi + 345. 1948. Rs. 21/-. [**D. 5**].
4. *Juvenile Delinquency and Destitution in Poona*—by Mrs. G. N. Ruttonsha. Demi 8vo, pp. 180. Rs. 8/-. [**D. 6**].
5. *Historical Grammar of Apabhraṁśa*—by G. V. Tagare. Royal 8vo, pp. xviii + 454. 1948. Rs. 21/-. [**D. 8**].

NAMAMALIKA OF BHOJA

Sources of Indo-Aryan Lexicography

18

NĀMAMĀLIKĀ OF BHOJA

CRITICALLY EDITED BY
E. D. KULKARNI AND V. D. GOKHALE

DECCAN COLLEGE
Post-Graduate and Research Institute,
POONA

NĀMAMĀLIKĀ OF BHOJA

CRITICALLY EDITED BY

EKANATH DATTATREYA KULKARNI, M.A., Ph.D.

Assistant Editor, Dictionary of Sanskrit on Historical Principles and Lecturer in Sanskrit and Comparative Philology, Deccan College Post-Graduate and Research Institute, Poona.

AND

VASUDEO DAMODAR GOKHALE, M.A., B.T.

Professor of Sanskrit, Shrimati Nathibai Damodardas Thakarsi College for Women, Poona

POONA

1955

INTRODUCTION

The Critical Edition of the Nāmamālikā attributed to Bhoja is based on the following Manuscripts :—

1. The MS. named here as A belongs to MSS. collection deposited at the Sarasvatī Mahāla Library Tanjore (No. 4791, BURNELL's Catalogue No. 10464a). It is written on palm leaf, 17 × 1½ inches in size. It consists of 17 leaves, each leaf containing 5 or 6 lines. It is written in Telugu characters and the number of granths contained therein is 300. It is complete. We could secure the Devanāgarī transcript of the said MS. for the purposes of editing the present edition.

2. This another MS. cited here as B, belongs to the Government Oriental MSS. collection Mysore (No. 258 A.). It contains 24 folios, having on each folio 27 to 29 lines on an average. It is in Telugu characters. It is complete.

3. The third MS. utilized for editing the present work and which is named as C belongs to the India Office MSS. Collection (No. 5176). It contains 31 folios and each folio has 20 to 21 lines on an average. It is complete.

Other Material Utilized[1]

Besides the MSS. described above, the Editors have consulted other lexicons, chiefly the *Vaijayantīkośa* of Yādavaprakāśa[2] and the MSS. of *Bālaprabodhikā* of Natkīrakavi.[3]

Orthographical Peculiarities

(1) Short *i* for long *ī* e.g. *bhogi* > *bhogī*, *yāgi* > *yāgī*, *candri* > *candrī*.

(2) Short *ukāra* is sometimes dropped, e.g. *savarṇe* > *suvarṇe*, *madgaḥ* > *mudgaḥ*.

(3) Visargas are dropped, e. g. *uccaiśravasi* > *uccaiḥśravasi*, *tatpāda* > *tatpādaḥ*, *purohita* > *purohitaḥ*.

(4) Anusvāras are occasionally dropped, e.g. *rucira* > *ruciraṁ*.

(5) *gh* is written for *kh*, e.g. *mayūghajanma* > *mayūkhajanma*, *śigharaṁ* > *śikharaṁ*.

(6) *c* is used for *ch*, e.g. *cāyā* > *chāyā*, *curikā* > *churikā*.

(7) *ch* is written for *cch*, e.g. *vanachāgaḥ* > *vanacchāgaḥ*.

(8) *ṭh* is substituted for *ṭ*, e.g. *kārakaṇṭhakaṁ* > *kārakaṇṭakaṁ*.

---

1. For other works consulted vide page 41.
2. Edited by Dr. Gustav OPPERT, 1893.
3. We have consulted the MSS. belonging to Oriental MSS. Library, Tanjore (No. 5020) and Oriental MSS. Library, Mysore (No, A247).

(9) *dh* and *th* are confused, e.g. *niśīdhinī* > *niśīthinī*, *varūdhinī* > *varūthinī*.

(10) *p* and *v* are confused, e.g. *tpatra* > *tvatra*, *pratī* > *vratī*, *kapaṭaḥ* > *kavaṭaḥ*.

(11) *ph* is written for *bh*, e.g. *phurjaraṁ* > *bhurjaraṁ*.

(12) *b* is used for *v*, e.g. *dhrubāvāsaḥ* > *dhruvāvāsaḥ*.

(13) *m* and *v* are confused, e.g. *turāmaṇaṁ* > *turāyaṇaṁ*.

(14) *ś* is written for *s* and vice versa, e.g. *śitaḥ* > *sitaḥ*, *śenādhipaḥ* > *senādhipaḥ*, *sveta* > *śveta*, *asītalā* > *aśītalā*.

(15) *ḷ* is used for *l*, e.g. *mañjuḷataru* > *mañjulataru*, *vidaḷaṁ* > *vidalaṁ*.

(16) Sometimes the letters are transposed, e.g. *damanaṁ* > *madanaṁ*.

All the peculiarities mentioned above are recorded in the footnotes and are corrected in the constituted text. In constituting the critical text preference is given to the suitable reading as evidenced by the MSS. material and the rejected readings have been relegated to the columns of the footnotes.

The present work has been divided into three chapters as follows : (1) *Svargādināmadheyaprakaraṇa*, (2) *Gaganādināmadheyaprakaraṇa* and (3) *Bhūmyādināmadheyaprakaraṇa*.

Our present work appears to have been much influenced by the *Vaijayantīkośa* of Yādavaprakāśa, as many lines from our text are found in it. We have pointed out in the 'Critical Notes' the lines which are common to both the works.

Another point to be noted here is that we find a great number of passages from our text in the work of *Bālaprabodhikā*. So we have drawn upon these two lexicons to a large extent and these have helped us enormously in deciding the readings especially when all the three MSS. we utilized presented corrupt readings e.g.

We read with *Vaijayantī*—

298. *pareṣṭukā* for A *pareṣṭhakā*, BC *pareṣṭakā*.
421. *apunarbhavaḥ* for ABC × × × *bhavaḥ*.
464. *saṁḍānabhāgaḥ* for ABC *sadānabhāgaḥ*.
464. *proha* for ABC *prāha*.
585. *kāravaḥ* for ABC *kauravaḥ*.

On the strength of our present work we can correct certain wrong readings which have crept in *Vaijayantī* e.g.

pāśabandhanaṁ of *Vaijayantī* (70.122) is apparently a wrong reading for *pādabandhanaṁ* (310).

Similarly *jaṅgitāḥ* of *Vaijayantī* (72.5) is clearly a mistake for *juṅgitāḥ* (331).

The Authorship of Nāmamālikā.

The colophons at the end of each chapter of the work run as follows :—

Chapter I :—*iti nāmamālikāyām ahirājenaiva saṁgṛhītāyāṁ svargādināmadheyaprakaraṇam idam akhilasukavimatam.*

Chapter II :—*iti nāmamālikāyām ahirājenaiva saṁgṛhītāyāṁ gaganādināmadheyaprakaraṇam idam akhilasukavimatam.*

Chapter III :—*iti nāmamālikāyām ahirājenaiva saṁgṛhītāyām bhūmyādināmadheyaprakaraṇam akhilasukavimatam. Bhojanighaṇṭuś ca samāptaḥ.*

From the above colophons we know that the work is a compilation (*saṁgṛhīta*) and it is attributed to Ahirāja. But this Ahirāja is no other than Bhoja and it is clear from the colophon of the third chapter. Dr. BURNELL, (in his catalogue No. 10464a) also conjectured that the author of the *Nāmamālikā* should have been Bhoja, since in the margin of the work it is called *Bhoja Nighaṇṭu*. Secondly in the list of works attributed to Bhoja, is included our present work.[4] For these above considerations we feel that the author of *Nāmamālikā* is Bhoja and this Bhoja is King Bhoja of Dhārā, who flourished in 11th century A.D.[5]

We are sincerely grateful to Dr. S. M. KATRE, Director, Deccan College Post-graduate and Research Institute for allowing us to edit the work. Incidentally we take this opportunity to render our sincere thanks to Pt. M. C. DIXIT Shastri of the Dictionary Department of the Institute for helping us in collating the Telugu MSS. of the work. We are indebted to Dr. M. M. PATKAR for the inspiring help which he gladly rendered to us whenever we approached him. We offer our thanks also to the authorities of the MSS libraries, who made the above-mentioned MSS. available to us.

Editors.

---

4. Cf. *Śālihotra* of Bhoja, critically edited by E. D. KULKARNI (1953), page 13.
5. *Ibid.* page 14.

भोजसंगृहीता

नाममालिका।

शुभमस्तु

स्वर्गादिनामधेयप्रकरणम्।

वागीशं वरलक्ष्मीशं गौरीशं गणनायकम्।
कुमारं च हृदि ध्यात्वा क्रियते नाममालिका॥

स्वर्गो नाकत्रिलोकाग्र्यसुधावासबुधालयाः।
मन्दाकिनीधरो दिव्यः खपुरं तं नपुंसकम्॥

मेरुशृङ्गाग्रनगरं धाराधरपथस्थितम्। 5
देवेष्वनिमिषामर्त्यनिलिम्पामृतभोजिनः॥

वैमानिका यज्ञभुजो जरामरणवर्जिताः।
अनिद्राः खचरा नित्याः कनकाचलवासिनः॥

इन्द्रे स्युः प्राग्दिशानाथमहेन्द्रदनुजारयः।
सर्वाङ्गनयनागारिचिन्तामणिवरासनाः॥ 10

गोपः पुलोमजाकान्तो भोगी यागी महायशाः।
तत्पुरी लेखिनी तस्य सौधे च सुपताकिका॥

चिन्तामणौ महारत्नं श्यामोपल इतीर्यते।
कामधेनौ तु सुरभिः श्वेतगौरिति कथ्यते॥

---

1. BC omit नाममालिका. C omits शुभमस्तु. AB read भोजनिघण्टु after शुभमस्तु.
2. B क्रियन्ते (wrongly) for क्रियते.
3. AB नक° for नाक°. B मंधा° for मन्दा.
5. A °पथास्थितं, B °पदस्थितं for °पथस्थितं.
6. BC देवेष्य° for देवेष्व°.
8. B अनिद्रां for अनिद्राः. B निस्यां for नित्याः.
9. C प्राद्दिशा° for प्राग्दिशा°.
11. BC भोगि for भोगी. B यागि, C योगी for यागी.
12. B तत्पुरे for तत्पुरी. C लेखनी for लेखिनी. B तस्या for तस्य. A सुपतालिका for सुपताकिका.
13. A चिन्तामणिः for चिन्तामणौ. AB स्यामो° for श्यामो°.
14. BC स्वेत° for श्वेत°.

15 आयुधं च शतारं स्याद्वनं शृङ्गारनामकम् ।
पत्नी त्वस्य च पौलोमी देवेन्द्री(?)दिविजेश्वरा ॥

जयन्ते मोहनः स्वामी नलकूबरवल्लभः ।
उच्चैःश्रवसि दिव्याश्वो नीलवालः स हंसकः ॥

ऐरावते चतुर्दन्तो मन्दकः पीलुनामकः ।
20 मधुरो मञ्जुलतरुर्मन्दारतरुपञ्चके ॥

तत्प्रदेशे सुपर्णः स्यात्तत्पुष्पे गन्धिलं स्मृतम् ।
महामदस्तदामोदे तन्मूले रुचिरं स्मृतम् ॥

तत्पर्णं विदलं प्राहुस्तत्फलं पुष्कलं विदुः ।
सुगन्धिस्तद्वितरणे तच्छाया चन्द्रिका स्मृता ॥

25 मन्दाकिन्यां हरिपदी कनकाम्बुजगन्धिला ।
दिव्यकेलिसरश्चन्द्री सुकलेति निगद्यते ॥

तत्सैकते वसुरुचिस्तत्तीरे सुभगोदरम् ।
तदम्बुजानि हैमानि तन्मरन्दः करन्दकः ॥

तदब्जगन्ध आनन्दस्तत्किञ्जल्कः करञ्जकः ।
30 सुमेकस्तु सुधीरः स्याच्छिखरे तस्य बन्धुरः ॥

ध्रुवावासो मणिशिलस्तदीयास्तरवः सुखाः ।
तत्पादः स्यात्कनखलस्तन्नितम्बे विशालकः ॥

---

15. ABC वने for वनं.
16. AC × × × स्य पौलो × द्वेवेरी दिविजेश्वरा, B मन्यतेस्य जपालोमी देवेरि दिनिजेश्वरा.
17. AC मो × नः for मोहनः.
18. ABC उच्चैश्रवसि for उच्चैःश्रवसि. A नी × × लस्सहसकः, B नीलवालस्सहंसकः, C नी × × लसहासकः for नीलवालः स हंसकः.
19. A मंद for मन्दकः.
20. ABC मंजुळतरु for मञ्जुलतरुः.
21. AB सुपर्ण for सुपर्णः.
22. C तन्मूढे for तन्मूले. ABC रुचिर for रुचिरं.
23. ABC विदळं for विदलं. B प्राहु for प्राहुः.
24. A तचाया for तच्छाया.
25. B हरिपदि for हरिपदी.
26. AB दिव्यकेळिसरः, C विद्यकेळीसरः for दिव्यकेलिसरः. ABC चन्द्रि for चन्द्री.
27. B तत्तीरो for तत्तीरे.
30. ABC सुमेका तु for सुमेकस्तु. A शिगरे, BC शिघरे for शिखरे. A बन्दुरः for बन्धुरः.
31. AC ध्रुवावासो for ध्रुवावासो. C मणिश्रीलः for मणिशिलः. ABC तदिय्याः for तदीयाः.
32. ABC तत्पाद for तत्पादः.

अग्नौ पुरोहितः स्वैरी स्वाहानाथो मखी शिखी ।
हरिश्च शमने तु स्युरद्रिजक्षुद्रमुद्रकाः ॥

दण्डकः क्रूरदृष्टिश्च मुष्टिबन्धोऽसिताकृतिः । 35
तस्य प्रिया तु धूमोर्णा सुकर्णेति च कथ्यते ॥

तत्पाणिदण्डे तुमुलस्तत्पाशे वलनं स्मृतम् ।
तद्दूताः सूतकाः क्ष्वेलाः स्थाणवः प्राणिघातकाः ॥

जीमूतनामकास्तस्य नगरी खरमालिनी ।
वैतरण्यां त्वग्निधुनी पापभेदिन्यशीतला ॥ 40

दुस्तरा दुर्मुखी भीमा तत्तटी त्वसिपत्रिका ।
तदीयास्तरवः कुण्टाः सूचिकामुखनामकाः ॥

कोणपे तु कलङ्कः स्यादुषाचरवरः खरः ।
तस्य कान्ता दुरन्ता स्यान्निरन्ताद्याश्च वल्लभाः ॥

वरुणे तु महासारकशाधरकुशालयाः । 45
तत्पुरं वरणं ज्ञेयं तस्य जाया जयेरिता ॥

तत्पाशस्तु घनालीढस्तत्पुत्रो वरयूथपः ।
तत्सैन्यं जालयादः स्यात्तन्मन्त्री भुवनाधिपः ॥

वायुः प्राणिधृतः प्राणो जगत्प्राणस्तु धूसरः ।
तद्वाहे तु महावेगः संवेगस्तु तमोप्रजः ॥ 50

---

33. ABC अग्ने for अग्नौ. ABC पुरोहित for पुरोहितः. A शिधि, B शिघी for शिखी.
34. A हर्यश्च for हरिश्च.
35. AB क्रूरदृष्टिः for क्रूरदृष्टिः. A मुष्टिबन्धू- × ताकृतिः, B मुष्टिबन्धो शिताकृतिः; C मुष्टिबन्धू सिताकृतिः for मुष्टिबन्धोऽसिताकृतिः.
36. BC धूमोर्णी for धूमोर्णा. BC सुकर्णीति for सुकर्णेति.
38. ABC तद्धूताः for तद्दूताः. ABC सूतकाक्ष्वेळाः for सूतकाः क्ष्वेलाः. BC स्ताणवः for स्थाणवः. C प्राणिसूतकाः for प्राणिघातकाः.
40. ABC असीतळा for अशीतला.
41. AC भिमा for भीमा. AC तत्तटि त्वसितपत्रिका, for तत्तटी त्वसिपत्रिका.
42. ABC तदियाः for तदीयाः. C कुण्ठाः for कुण्टाः.
43. ABC कळङ्क for कलङ्कः. AB उषाचरवरा for उषाचरवरः.
47. A घबाळीढः, B घनाळीढः, C घनाळिढः for घनालीढः.
48. ABC जालपादं for जालयादः. A (before corr.) भुवसाधिपः for भुवनाधिपः.
49. B वायु for वायुः. C प्राणिसृतः for प्राणिधृतः.
50. B तमाप्रजः for तमोप्रजः.

राजराजः कुबेरः स्यात्तत्सुतो मणिकण्ठकः।
तत्सेवधिः सुभाग्यः स्यात्पुरं भ्रमरकाह्वयम् ॥
ईशाने कङ्कटीकः स्याज्जटाटीरकठोरकौ।
रुम्बाकर्णः शम्बरारिभेदनः श्रीधरः सितः ॥
55 तदास्थानं शुभकरं तदगारं सतारकम्।
तन्निष्कुटो घनकुटो भद्राख्यं तस्य वाहनम् ॥
तद्गणा भीषणा घोणाः काणाः खञ्जाः करालकाः।
तस्य प्रिया तु कौत्केली कालिकालीकलाधराः ॥
विनेता विघ्नराजे स्यान्मुदिरो मोदकाशनः।
60 सुवर्णाब्जसरःस्वामी गुहो वेलायुधः स्मृतः ॥
भैरवो भीरवो भीरो वटुनाथः पिशाचराट्।
वेत्रिकर्णेजपहया नन्दिभृङ्गिऋडादयः ॥
शम्भुस्वयम्भूकविता मेषनामाष्टलोचनः।
प्रधानी मुखजानिः स्यान्मेधावी नाभिभूर्भवः ॥
65 तस्याङ्गना तु गीर्देवी शीर्षद्वारनिवासिनी।
विशदा नीलचिकुरा वीणा तस्यास्तु कच्छपी ॥

---

51. AB कुबेर, C कौबेरं for कुबेरः.
52. AB सुभाग्य for सुभाग्यः. B भ्रमरकाह्वयं for भ्रमरकाह्वयं.
53. A कङ्कठीक, B कङ्कटीक for कङ्कटीकः. A जठाडीरकठोरकाः, B जटीटीरकठोरकाः, C जटाटीरकठोरकाः for जटाटीरकठोरकौ.
54. A कम्भाकर्ण for रुम्बाकर्णः. AB शम्बरारिभेदन for शम्बरारिभेदनः. ABC शितः for सितः.
55. C तथास्थानं for तदास्थानं. C सुतारकं for सतारकं.
56. B तंन्निष्कुटी, C तन्निष्कुटीः for तन्निष्कुटो. A धनकुठो for घनकुटो. B भद्राभं for भद्राख्यं.
57. ABC घोणा for घोणाः. ABC काणा रुखंजाः for काणाः खञ्जाः. C कराळकाः for करालकाः.
58. AC तस्या for तस्य. A कौत्कीकि. B कौत्कीरि for कौत्केली, A काळिकोळिकलाधराः. B काळिकाळिकलाधराः, C काळिकाळिकलाधरा for कालिकालीकलाधराः.
59. A मुदिरा for मुदिरो. C मेदकाशनः for मोदकाशनः.
60. ABC सवर्णाब्जसरःस्वामि for सुवर्णाब्जसरःस्वामी. B गुहे for गुहो. ABC वेलायुध for वेलायुधः.
61. B भिरवो for भीरवो.
62. AC °भिंगि° for °भृङ्गि°. B °ऋडारयः, C °भुतादयः for ऋडादयः.
63. C शम्भुः for शम्भु°. A °स्वयम्बु° for °स्वयम्भु°. C °कलिता for कविता.
64. BC प्रधानि for प्रधानी. ABC मुखजानि for मुखजानिः. AB स्यार्वधानी, C स्यात्वधानी for स्यान्मेधावी. A नाभिभूभवः, B नाभिजं भवः, C नाभिजो भवः for नाभिभूर्भवः.
65. AB गिर्देवि for गीर्देवी.
66. AB कछपि, C कंचपि for कच्छपी.

तद्वाहने तु मञ्जीरस्तदक्षसर ईक्षणम् ।
वर्णोदरं तदीयं स्यात्पुस्तकं तद्गतिर्नयः ॥
विष्णुर्हरिर्वनचरो विवाहो विहगध्वजः ।
श्रीपर्णनयनः शृङ्गी भारतीमालिकाधरः ॥ 70
तत्कौस्तुभे सुधासारः सुरागः सुन्दरः स्मृतः ।
श्रीवत्से तस्य शृङ्गारः सेव्या तु वनमालिका ॥
तच्चक्रं तु सहस्रारं वृत्तं शुभ्रमितीर्यते ।
तत्पाञ्चजन्ये सुग्रीवः षोडशावर्त ईर्यते ॥
तत्कौमोदक्यविकला तत्खङ्गो मकराननः । 75
तस्य शार्ङ्गं गुणनिधिस्तद्दूताः श्यामलाः स्मृताः ॥
तदासनं मृगमुखं भुवनं तस्य शंकरम् ।
तत्केलीवनमाशास्यं तद्वेश्म नवमौक्तिकम् ॥
तदीयशयनं काशी वसनं तस्य काञ्चनम् ।
लक्ष्मीस्तु लोकजननी सती सरसिजा मता ॥ 80
तत्कुमारस्तु कन्तः स्याददृश्यतनुरात्मजः ।
केलिनी तस्य वनिता केतुस्तस्य चलाचलः ॥
कार्मुकं तस्य कान्तारः शरास्तस्य तु पल्लवाः ।
रजको वाहनं तस्य रथो मलयजः स्मृतः ॥

इति नाममालिकायामहिराजेनैव संगृहीतायां स्वर्गादिनामधेयप्रकरण-
मिदमखिलसुकविमतम् ॥

---

67. A मंजीरत°, BC मंजीरस्ति° for मञ्जीरस्त°. A °दक्षसरं for °दक्षसर. C ईक्षणा for ईक्षणं.
68. ABC तदियं for तदीयं. B पुस्तक for पुस्तकं. AB तद्दति° for तद्गति°.
69. A विष्णुहारि° for विष्णुर्हरि°.
70. B श्रीपर्णनयन for श्रीपर्णनयनः.
73. ABC °मितीर्यंतो for °मितीर्यते.
74. AB सुग्रीव for सुग्रीवः.
75. A प × × ननः for मकराननः.
76. A गुण × धि° for गुणनिधि°.
77. C भुवन for भुवनं.
78. ABC तत्केळीवन° for तत्केलीवन.
79. AB तदिय° for तदीय°. B काशि for काशी. A वसचं for वसनं.
80. AB सति for सती.
81. AC कंत, B कंत्य for कंतः. ABC अदृश° for अदृश्य°. ABC °मात्मजः for रात्मजः.
82. AC अनी, B कोंळिनि for केलिनी. AC कितुस्त ×, B कितुस्तस्य for केतुस्तस्य.
83. कांता × for कान्तारः. BC शताः for शराः.
84. C रजकं for रजको. AC वाहनको for वाहनं. ABC मलयज for मलयजः. A श्वं व्याख्यातायां for संगृहीतायां. AC °सुक्रविमता, B °सुकविनुतम् for °सुकविमतम्.

गगनादिनामधेयप्रकरणम् ।

85 आकाशं शब्दगुणकं नक्षत्रपदमच्युतम् ।
विद्याधराप्सरोयक्षरक्षोगन्धर्वमन्दिरम् ॥
छायायां तस्य तिमिरं तमिस्रं भ्रमरं तमः ।
पुंस्यन्धकारो मलिनो लोकान्धकर ईर्यते ॥
आकाशकुसुमं तारं कोरकं कारकण्टकम् ।
90 निरकं निर्मलं संग्यं नक्षत्रेषु निगद्यते ॥
दिवसे दृश्यमानेषु तारकेषु च केतवः ।
नभसि स्थाणुरूपेण दृष्टं यद्घोरनीलभम् ॥
तद्धूमकेतुनाम स्यात्कालदूतः स एव हि ।
रक्तभे तूपरागः स्यात्कृष्णर्क्षे तु कुवेलयम् ॥
95 शुक्रे कविः शुचिः काव्यः पूर्वदेवपुरोहितः ।
गुरौ बृहस्पतिः सूर्यः सुरेज्यः सूरिवासवौ ॥
चन्द्रो निशाकरः शौरिः कलशाब्धिभवो भवः ।
भवावतंसः कमली वार्धिसूनं नपुंसकम् ॥
बिम्बे तस्य सुधासारः कलापूर्णं च मण्डलम् ।
100 चन्द्रिका च सुधा छाया सुखा ज्योत्स्ना तु कौमुदी ॥
वन्यलो विशदा शारदेन्दुकान्तिर्निगद्यते ।
हिमे च मधुपूरः स्यात्तुषारस्तुच्छशीकरः ॥

---

85. B नक्षत्रपथं, C नक्षत्रं पदं for नक्षत्रपदं.
86. A विद्यादरोत्प्सरो°, BC विद्याधरोत्प्सरो° for विद्याधराप्सरो°. A °रक्षा° for °रक्षो°.
87. AB तिमिरं, C तमिरं for तमिस्रं. AC भ्रमर for भ्रमरं.
88. A × कान्धकरः for लोकान्धकरः. AB इर्यते for ईर्यते.
89. ABC कारकण्ठकं for कारकण्टकं.
90. A नि × ×, C नीरकं for निरकं. AC × ग्य, B संग्य for संग्यं.
92. A omits दृष्टं यद्घोरनीलभं.
93. A का × × ×, B काल × यः, C कालतु × for कालदूतः.
95. BC काव्यं for काव्यः. B पूर्वं for पूर्व°.
96. ABC सुरेज्ज्यः for सुरेज्यः. A सूरिवासवः, B सूरिवासकाः, C सूरिवासकौ for सूरिवासवौ.
97. A चन्द्रौ for चन्द्रो. B निशाकर for निशाकरः.
100. ABC कौमुदि for कौमुदी.
101. AB वेण्णला, C वेंण्णाळा for वन्यलो. A शारदेंम° for शारदेन्दु°. ABC कान्ति for कान्तिर्.
102. AC हिमेव, B तामेव for हिमे च. ABC मधुपूर for मधुपूरः. A स्यात्तुषारस्तुछशीकरः, B स्यातुषारस्तुच्छशीकरः, C स्यातुषारस्तुचशीकरः for स्यात्तुषारस्तुच्छशीकरः.

तत्समूहे हिमानी स्याच्छीतलानी तु शीतलं ।
रात्रिर्निशीथिनी काली निशाकरकुटुम्बिनी ।
निशा स्याच्छुक्लपक्षे तु प्रसन्ना चन्द्रिकावती ॥ 105

पूर्णिमा पूर्णचन्द्रा स्यात्तत्क्षपा विमला भवेत् ।
कृष्णपक्षे निशाः कृष्णास्तामस्यस्तमसाप्लुताः ॥

अमायां स्यादमावास्या पैतृकः पितृवासरः ।
तद्यामिन्यां तमोरात्रिः कालरात्रिः करालिका ॥

सूर्यः सूरिर्ग्रहघनो हरिदक्षीणलोचनः । 110
हेलिः किरीटी पद्माप्तो हरिर्वासरवल्लभः ॥

गता गतानुगतिका छाया जायांशुमालिनः ।
शताङ्गे कूबरी तस्य मरुच्चक्रो महाजवः ॥

अमायुः पृतनाधीशो यन्ताहर्मुखसूचकः ।
परिधिः परिवेषः स्यात्स सूर्यावरणोऽपि च ॥ 115

तेजोमयं मण्डलं स्यान्मूर्तित्रयनिरन्तरम् ।
मयूखजन्मजीमूतघनाब्दहरिघोटकाः ॥

---

103. BC हिमानि for हिमानी. A सीतळानि, B सीतळानी, C सितळनी for शीतलानी. ABC सीतळं for शीतलं.

104. ABC रात्रि for रात्रिर्. AB निशीधिनी for निशीथिनी. A काळी, BC काळि for काली. BC °कुटुम्बिनि for कुटुम्बिनी.

106. ABC तक्षपा for तत्क्षपा.

107. C निशा for निशाः. B तामस्य for तामस्यः. AB तमसाः पुताः for तमसाप्लुताः.

109. A पद्या × त्यां, C तध्यामिन्यां for तद्यामिन्यां. ABC काळरात्रिः for कालरात्रिः. A करालिकाः, B कराळिका for करालिका.

110. A तूर्यः for सूर्यः. A स्सूरग्रंह × ×, C स्सूरिग्रह × × for सूरिर्ग्रहघनः. ABC अक्षिणलोचनः for अक्षीणलोचनः.

111. ABC हेळिः for हेलिः. ABC किरीटि for किरीटी.

112. B गतु, C गतं for गता. AB चाया for छाया.

113. AB कूबरि, C कोबारि for कूबरी. B तस्याका for तस्य. A मरुत्वक, C मरुत्पत्र for मरुच्चक्रो.

114. A अमा ×, C अमार for अमायुः. A × × × दीशः, B पतकाधीशः, C पतनाधीशः for पृतनाधीशः.

115. A × रिधिः, C परिधिं for परिधिः. AB परिवेष, C परिवेषे for परिवेषः. A स्यात्, B स्यास, C स्या × for स्यात्स. A यूधावरणापि, B यूघावरणोपि, C यूघावरणेपि for सूर्यावरणोऽपि.

116. BC °निकेतनं for निरन्तरं.

117. AC मयूघजन्मं, B मयूघजन्मा for मयूखजन्म°.

इन्द्रचापे मणिधनुश्चित्रं वल्मिकसंभवम्।
करको वर्षपाषाणो दन्तभेदी विमुक्तकः ॥

120 सौदामिनी तडिद्विद्युच्चञ्चचपलिका चला।
मेघनादे महागर्जो घनाघननिनादकः ॥

इति नाममालिकायामहिराजेनैव संगृहीतायां गगनादिनाम-
धेयप्रकरणमिदमखिलसुकविमतम् ॥

भूम्यादिनामधेयप्रकरणम्।

वसुन्धरा रत्नगर्भा धारुणी धरणी धरा।
धारिणी भूतधात्री च विश्वधात्री क्षमा सहा ॥

वर्तुलं वलयं वृत्तं मण्डलं चक्रवालकम्।
125 विन्ध्योत्तरपदे तु स्यादुत्तरापथसंज्ञिकः ॥

चोलस्तु दक्षिणे देशे काञ्चीदेशस्तु पल्लवः।
समुद्रे तु नदीनाथः शैवलाकरनीरधी ॥

वेलावलयकाण्डेशकान्तानयनसंनिभाः।
आद्यन्धौ लवणोदश्च लावणः शङ्खकारणम् ॥

130 धीरश्च मुक्ताजनको लोलकल्लोलमालिकः।
द्वितीयाम्बुनिधाविक्षुरसपूर्णो रसालयः ॥

---

119. AC वष° for वर्ष°. ABC दन्तभेदि for दन्तभेदी.

120. B सौधामिनी for सौदामिनी. AC तटिद्, B त × द् for तडिद्. A चपलिकां चला for चपलिका चला.

121. AC मेहनाथे, B मेहनाथो for मेघनादे. C महागर्भा for महागर्जा. A °विनादकः for °निनादकः. C °प्रकर्ण° for °प्रकरण°. AC add श्रीशारदाम्बायै नमः. B adds श्रीशारदाम्बायै नमः। शुभमस्तु.

122. A धारिणे for धारिणी. ABC विश्वधात्रि for विश्वधात्री. AB सह for सहा.

124. ABC चक्रवाळकं for चक्रवालकं.

125. B वाद्येत्तरपदे, C विन्द्योत्तरपदे for विन्ध्योत्तरपदे.

126. ABC चोळस्तु for चोलस्तु. B कांच°, C कांचि° for काञ्ची°.

127. AC नदीनाथ for नदीनाथः. B शैवाल° for शैवला°.

128. AB °कांदेश° for °काण्डेश°. B °सन्नभाः for संनिभाः.

129. A आद्यब्दौ for आद्यन्धौ. C लावण for लावणः. A शंक°, B शंब° for शङ्ख°.

130. A धिकश्च for धीरश्च. A लाल° for लोल°.

131. BC °रसपूर्णे for °रसपूर्णो. C रसोलयः for रसालयः.

कान्ताधरसखा कल्यः कश्याब्धौ तु सुरालयः ।
उन्मादको दुराधर्षः सर्पिरब्धौ तु सार्पिषः ॥

तेजोनिधिर्मदकरो दधिवार्धिस्तु दौध्निकः ।
कलुपः प्रातराहारः कमलावल्लभप्रियः ॥ 135

क्षीरोदे कलशाब्धिः स्यान्मधुरो माधवालयः ।
लक्ष्मीगुरुर्वदान्यश्च हरिश्वशुर इष्यते ॥

सुधाजनयिता साधुः सुराहारप्रदोऽनघः ।
शुद्धोदे निर्मलः शुद्धो मेघोन्मादकरोऽनघः ॥

जम्बूद्वीपे महाद्वीपः कुमारः पर्वतालयः । 140
षट्पञ्चाशद्देशग्रहः समस्तद्वीपनायकः ॥

सुवर्णनिलयो रत्नी प्लक्षद्वीपे शिलामयः ।
सुवर्णवालुकाधारः सुस्थिरः सूर्यवल्लभः ॥

कुशद्वीपे कुलीनः स्यात्कुसारनिधिरिष्यते ।
कौशिकः कङ्कटीकः स्यात्कणादवसतिः स्मृतः ॥ 145

क्रौञ्चद्वीपे महाभोगः पञ्चास्यजननालयः ।
काञ्चनाद्रिः करीणः स्याच्चञ्चलानिलयः स्मृतः ॥

---

132. A कोंताथर° for कान्ताधर°. AB कश्याब्दा for कश्याब्धौ.

133. A उन्मादण for उन्मादको. ABC स्सर्पिरब्दौ for सर्पिरब्धौ.

134. A मदकर for मदकरो. C दाब्धिकः for दौध्निकः.

135. AC प्रातदाहारः, प्रातदाहौरः for प्रातराहारः.

136. A क्षीरोदके for क्षीरोदे. A कलशाब्धि, B कलशाब्दः, C कलशाब्दिः for कलशाब्धिः. ABC मथुरो for मधुरो. A माथवालयः for माधवालयः.

137. A लक्ष्मि for लक्ष्मी.

138. C °जनइता for °जनयिता. AB °प्रदोघनः for प्रदोऽनघः.

139. AC मे × न्मादकरः, B मेघन्मादकरः for मेघोन्मादकरः. AC अवघः for अनघः

140. A महादिपः for महाद्वीपः

141. B °द्विप° for °द्वीप°

142. AC सवर्णा°, B सवर्ण°, for सुवर्ण. ABC रत्नि for रत्नी. A शिलामथः, C शिलागुयः for शिलामयः.

144. AC कलीन for कुलीनः.

145. A कंकटिक for कङ्कटीकः. AC कणादवसति for कणादवसतिः.

146. B महोभोगः for महाभोगः.

147. ABC करीण for करीणः. ABC स्या for स्याच्.

शाल्मलः शाल्मलीद्वीपे शाक्यः कौस्तुभसंभवः ।
अष्टादशेषु द्वीपेषु पर्यायेण जनाश्रयाः ॥

150 वस्तुसंभारनिलयाश्चीनसिंहलनामकाः ।
जाम्बूनदे तु कुलुकुगाल्वजाल्वातिमोहनम् ॥

हाटकं भद्रकं चन्द्रं कर्णीकुसुमजप्रभम् ।
कनकं रसबीजं स्याद्गन्धकोद्भवमभ्रकम् ॥

दशवर्णे सुवर्णे श्रीः पञ्चवर्णे तु रैः स्मृतम् ।
155 तुङ्गं तु द्वादशे वर्णे कुदणं षोडशे स्मृतम् ॥

शतवर्णे शातकुम्भं मेरु साहस्रवर्णके ।
रूप्ये तु रजतं शुभ्रं दुर्वर्णं कलधौतकम् ॥

पादभूषार्हकं तारं वैढिकं विमलं स्मृतम् ।
आरकूटे तु रीतिः स्त्री सुवर्णवलिनं स्मृतम् ॥

160 नीचं द्राविडभूषार्हं पैत्तलं पित्तहेतुकम् ।
राजरीत्यां ब्रह्मरीतिः स्वर्णरीतिर्महेश्वरी ॥

वङ्गं सीसं च योगेष्टं त्रपु स्यान्मुखभूषणम् ।
अयः कृष्णायसं लोहं तीक्ष्णं कालायसं मतम् ॥

मन्दप्रियं च कठिनमयस्कान्ते त्वयोमणिः ।
165 रत्नं तु रत्नसामान्ये मणिर्माणिक्यमेव च ॥

---

148. C शाल्मलि° for शाल्मली°. A कौसुंभसंभव, B कौसुंभसंभवः for कौस्तुभसंभवः

149. A जनाश्रयः for जनाश्रयाः.

150. AB °सिंहळनामकाः, C °सिंहळनायकः, for °सिंहलनामकाः.

151. ABC जांजूनदे for जाम्बूनदे. A कुलुकुगाल्वजाल्वानिमोहनं, B कुलुकुगाल्यजाल्वातिमोहनः, C कुलुकुगाल्पजाल्यातिमोहनं for कुलुकुगाल्वजाल्वातिमोहनं.

152. A चन्द्र for चन्द्रं. A कर्णि सुदुप्रभं, C कणि × सुम × प्रभं for कर्णीकुसुमजप्रभं.

153. C गन्धको × वं for गन्धकोद्भवं.

154. ABC सवर्णे for सुवर्णे. AC श्रिः for श्रीः. ABC रै for रैः.

155. तंगं, C तुगं for तुङ्गं.

157. A रजितं for रजतं.

159. AC रितिः for रीतिः. AC त्रि for स्त्री. B सुवर्णवरिनं for सुवर्णवलिनं.

160. A द्राविद° for द्राविड°. ABC पैत्तळं for पैत्तलं.

161. C राजंत्यां for राजरीत्यां. B ब्रह्मरीति, C ब्रह्मारिति for ब्रह्मरीतिः. AC स्वर्णतिर्, B स्वर्णति × for स्वर्णरीतिर्.

162. BC सिसं for सीसं. ABC योगेष्टं for योगेष्टं. A त्रप्यः, B त्रुपुः for त्रपुः.

164. C × दप्रियं for मन्दप्रियं. ABC कटिनं for कठिनं. BC अयस्काते for अयस्कान्ते. A त्ययोमणिः for त्वयोमणिः.

165. C रत्नसामान्य for रत्नसामान्ये.

भण्यं मणिकं शबलमनर्घं जीवरत्नकम् ।
दाक्षायणं रत्नवरं तत्तु जम्बूनदीभवम् ॥

पद्मरागे रविमणिः कुरुविन्दं तु कोरकम् ।
पक्वदाडिमबीजाभं माणिक्यं शिखरं मतम् ॥

इन्द्रनीले मसारं स्यान्महानीलं महोपलम् । 170
तद्भेदे तु तृणग्राही तत्पारावतमुच्यते ॥

विडूरजे विडुरजं प्रावृड्जं वालवायजम् ।
श्यामं मरकतं पक्ष्यं स्निग्धं मसृणमुच्यते ॥

गोमेधिकं मेधिकं स्याद्भुर्जरं घसृणं स्मृतम् ।
मुक्तामणिः शौक्तिकेयं श्वेतद्वीपभवं वसुः ॥ 175

माणिक्यं पौष्यकं शङ्खः पुलको विमलादयः ।
शैलोऽगः पर्वतः क्ष्माभृत्सानुमान्दुर्गमो गिरिः ॥

कुध्रः कुत्कीलबन्धाकी फलिगस्तु शिलोच्चयः ।
चित्रकूटः सुवेले स्यात्त्रिकूटस्त्रिककुत्समः ॥

परापरश्चक्रवालो लोकान्तो लोकवीक्षणः । 180
मलयस्त्रिकलाषाढौ विन्ध्यस्तु जलवालकः ॥
हिरण्यनाभो मैनाकः सुदारुः पारियात्रकः ।
माल्यवांस्तु प्रस्रवणो हिमवांस्तु हिमालयः ॥

---

167. ABC रत्नवणं for रत्नवरं. ABC ततु for तत्तुः. AC °नदि° for °नदी°.
168. ABC रविमणि for रविमणिः.
169. A शिधरं, BC शिघरं for शिखरं.
170. BC मसूरं for मसारं.
171. ABC तद्भद्रे for तद्भेदे. AB तृणग्राहि, C तृणाग्रावा for तृणग्राही.
172. A प्रावृडजं for प्रावृड्जं.
173. C मरतकं for मरकतं.
174. ABC फुर्जरं for भुर्जरं.
175. A स्वेताद्विभरं, BC स्वेतद्वीपभवं for श्वेतद्वीपभवं.
176. B पौष्टकं for पौष्यकं. A पुढको, C पुलके for पुलको. AC विमळादयः, B निमळादयः for विमलादयः.
177. AB शैलो, C शैलोगः for शैलोऽगः. A सानुमांदूदुगंमो, B सानुमांदूदुगमो, C सानुमां दुर्गमो for सानुमान्दुर्गमो.
178. AB कुद्ऋः, C कुद्धः for कुध्रः. AC °भंधारी, B °भंघाली for बन्धाकी. ABC शिलोचयः for शिलोच्चयः.
179. ABC स्यात्रिकूटः for स्यात्त्रिकूटः.
180. ABC चक्रवाळो for चक्रवालो. AB लोकविक्षणः, C लोकलिक्षणः for लोकवीक्षणः.
181. AB त्रिकलाषाडौ for त्रिकलाषाढौ. AB विध्यः for विन्ध्यः. ABC जलवाळकः for जलवालकः.
182. B मैनाक for मैनाकः.
183. BC मूल्यंवास्तु for माल्यवांस्तु. A पिमालयः for हिमालयः.

रजताद्रिश्च कैलासो हराद्रिर्महिषश्च सः।
185 वेङ्कटो वृषभः सिंहः केसरः केशवप्रियः॥

उदयः प्रातरद्रिः स्यात्पराद्रिः पश्चिमाचलः।
गैरिकं पीतधातुः स्यात्कुनटी तु मनःशिला॥

रोचनी रञ्जनी हृद्या रसनेत्रा महारसा।
करवीरकरा विद्युन्नागजिह्वा मनोऽभिधा॥

190 कानने वृक्षकं वार्क्ष्यं जटिलो बहुपाद्वटे।
कामाङ्कः स्त्रीप्रियश्चूतः कपिचूतः कपिप्रियः॥

श्रीवृक्षः श्यामलोऽश्वत्थः प्लक्षश्चलदलोऽङ्गुलः।
उदुम्बरः प्राणिफलो मशकी हेमदुग्धकः॥

पलाशे किंशुकः पर्णो वातपोतस्त्रिपर्णकः।
195 बिल्वे मालूरमाङ्गल्यौ नारङ्गे तक्रवासनः॥

बीजपूरे मातुलुङ्गो लुङ्गः सुफलपूरकौ।
अथात्यम्ला मातुलुङ्गी पूतिपुष्पी वृकाम्लिका॥

छत्रे तु करको वृक्षो मल्लिकाकुसुमप्रियः।
स्त्रीप्रियो वञ्चुलोऽशोकः कङ्केलिः कर्णपूरकः॥

---

184. C हराद्रि for हराद्रिर्. AB महीशः, C महिशः for महिषः.
186. ABC प्रातरद्रि for प्रातरद्रिः. ABC पश्चमाचलः for पश्चिमाचलः.
187. ABC पितधातु for पीतधातुः.
188. ABC रोचनि for रोचनी. ABC रंजनि for रञ्जनी. AC रसवेत्र, B रसनेत्र for रसनेत्रा. B महीरसा, C महारसाः for महारसा.
189. C नागजिंह्वा for नागजिह्वा. ABC मनोभिदा for मनोऽभिधा.
191. AC कामांक for कामाङ्कः. AC स्त्रिप्रियः for स्त्रीप्रियः. A कार्पचूतः for कपिचूतः.
192. A चलदलोंगुल, C चलगलोंगुलः for चलदलोंऽगुलः.
193. B उदुंबर for उदुम्बरः. AC पाणिफलो, B फाणिफलो for प्राणिफलो. A मशको for मशकी. ABC हेमदुद्धकः for हेमदुग्धकः.
194. ABC किंशुक for किंशुकः. B पणो for पर्णो.
195. ABC °माङ्गल्यौ for °माङ्गल्यौः. AB नारंग्रे for नारङ्गे.
196. B बीजापूरे for बीजपूरे. A × तलुंगो for मातुलुङ्गो. BC सुफलपूरका for सुफलपूरकौ.
197. B अधा° for अथा°. A मातुलुंगि, C मातुलुंग्गि for मातुलुङ्गी. ABC पूतिपुष्पि for पूतिपुष्पी. ABC वृकाम्ळिका for वृकाम्लिका.
199. B त्रिप्रियो for स्त्रीप्रियो. AB वञ्चुळो, C वञ्जुळो for वञ्चुलो. A कुंकेळिः, BC कंकेळिः for कङ्केलिः. B कर्णपूरके for कर्णपूरकः.

हेमपुष्पोऽप्यथोऽङ्कोलः सिद्धौषधफलोदयः । 200
द्रोहग्राहे तु कतको द्रावणः स्रवरः सराः ॥

उल्लेखनीयो लक्ष्मीवांस्तेरस्तोयप्रसूदनः ।
गुग्गुलौ कालनिर्यासो देवधूपो महेश्वरः ॥

कामः पुरो जटायुश्च कुम्भोलूखलकं वरम् ।
शोभाञ्जने तीक्ष्णगन्धः शिग्रुकाक्षिवमोचकाः ॥ 205

कृष्णे मरुङ्गी रक्तेऽस्मिन्मधुशिग्रुः सुभञ्जनः ।
वासन्ते स्यात्कुरवको मदनो धूर्तनामकः ॥

बालपत्रे तिक्तसारः खदिरो दन्तधावनः ।
तिलके पुलकः श्रीमान्सुगन्धो मुखमण्डनः ॥

निम्बे पार्वतकैडर्यद्वेषिच्छर्दनमाथिकाः । 210
हलिः पृथुच्छदः शाकः पुत्रजीव्यक्षकः फलः ॥

महामुनिः स्याद्रुद्राक्षे द्विमुखे तु पराङ्मुखः ।
एकास्ये त्वत्र महिमोऽमुख्यमक्षकमीर्यते ॥

चम्पके कमनीयः स्याद्गन्धफल्यस्य मञ्जरिः ।
कपिला पिच्छिला भस्मगर्भा मण्डलपत्रिका ॥ 215

जम्ब्वां त्रिसारा विरुजा महाजम्ब्वां महाफला ।
भल्लातक्यां त्रिलिङ्गोऽयमग्निमुख्यप्यरुष्करः ॥

---

200. AB °प्यर्थोकोला, C °प्यधांकोलो for °प्यर्थोऽकोलः.
201. AB स्नदरः for स्रवरः. AB सदाः for सराः.
202. ABC उल्लेखनिय्यो for उल्लेखनीयो. B स्तिर° for स्तेर°. A °प्रसूदन for प्रसूदनः.
203. ABC कालनिर्य्यासे for कालनिर्यासो. AC देवधूहि for देवधूपो.
204. A बरं for वरं.
205. ABC °मोचका for °मोचकाः.
206. A मरुगी for मरुङ्गी. A रते ? for रक्ते.
207. A कुरवकरि, B कुरवकी for कुरवको.
209. A मुखमंदनः for मुखमण्डनः.
210. ABC °मायिकाः ? for °माथिकाः.
211. ABC थहलिपृछ (C °छ)कः for हलिः पृथुच्छदः. ABC पुत्रजिव्यक्षकः for पुत्रजीव्यक्षकः.
212. B च for तु.
213. ABC त्पत्र for त्वत्र.
214. ABC कमनिय्यः for कमनीयः. A स्यागदंफल्यस्य, B स्याद्गंपल्यस्य, C स्याद्गंफल्यस्य for स्याद्गन्धफल्यस्य. ABC मञ्जरि for मञ्जरिः.
215. AC पिछिला, B पिचिला for पिच्छिला. AB भस्मागर्भा for भस्मगर्भा. ABC मण्डळ° ? for मण्डल°.
216. C त्रिसूरा for त्रिसारा. AC विराजा, B विराजा for विरुजा. A महाफलाः for महाफला.
217. C भल्लातस्या for भल्लातक्यां. ABC त्रिलिंगायं for त्रिलिङ्गोऽयं.

कोकिलाक्षे तु काण्डेक्षुरिक्षुरः क्षुरकः क्षुरः ।
सोमवल्लिः पूतिफलिः सोमराजिरवल्गुजा ॥

220 मल्लिकायां विचकिलो मङ्गलं तस्य सौरभः ।
माङ्गल्यं तु वरारोहा कथ्यते नवमल्लिका ॥

मालती राजपुत्री स्यात्सुगन्धा नवमालिका ।
भारती तुलसी सेव्या द्रोणो वैकुण्ठ ईश्वरी ॥

अल्पमाले तु वैकुण्ठो बिल्वगन्धो वचाच्छदः ।
225 कालपर्ण्यां तु सुरभिः करालः कालमालिका ॥

ऋषिणी द्रोणिका छत्रा चक्षुष्या द्रोणिपुष्पिका ।
नागवल्ली तु ताम्बूली तथा ताम्बूलवल्लिका ॥

ब्राह्म्यां सत्यवती ब्रह्मी मत्स्याक्षी सोमवल्लरी ।
मारीषो जीवमारीषः काण्डमारीष ओलकः ॥

230 जलजोऽसौ सञ्जटको भूस्फोटं भूमिकन्दकम् ।
हरिपर्णे मूलकोऽस्त्री सैरिमं नीलकण्ठिका ॥

ज्योत्स्ना स्वल्पफला ग्राम्या मृदङ्गः कृतवेधनः ।
अथ शृङ्गयां दीर्घफला मागधी मनलोत्तमा ॥

---

218. A कोकिलाभ्रे (?)त्रु for कोकिलाक्षे तु. ABC °रि × × for °रिक्षुरः.।
219. ABC सोमवल्लि for सोमवल्लिः. ABC पूतिफलि for पूतिफलिः. ABC सोमराज° for सोमराजि°.
220. AC विचलिको, B विकचिको for विचाकिलो. ABC मंगळं for मङ्गलं.
221. ABC मांगळ्यं for माङ्गल्यं. AB कद्यते, C कथ्यंते for कथ्यते. A वमल्लिका, B × दमल्लिका, C न × मल्लिका for नवमल्लिका.
223. C °ईश्वारि for °ईश्वरी.
224. AB वचाछदः, C वछाचदः for वचाच्छदः.
225. AC कालवर्ण्ये, B कालवर्ण्य for कालपर्ण्यां. B कराळः for करालः. B काळमाळिका for कालमालिका.
226. ABC ऋषिणि for ऋषिणी. ABC चक्षुस्या for चक्षुष्या. ABC दोणिपुष्पिक for द्रोणिपुष्पिका.
227. BC तांबूलि for ताम्बूली.
228. A ब्रंह्मं, B ब्राह्म्य, C ब्राह्म्यं (?) for ब्राह्म्यां. BC सत्यवति for सत्यवती. A ब्रंही for ब्रह्मी. ABC मत्स्याक्षि for मत्स्याक्षी.
229. ABC वोलकः for ओलकः.
230. B संजटीक, C संजटिकः for सञ्जटकः
231. A ग्रैरिमं for सैरिमं. AC नीलकंटिका for नीलकण्ठिका.
232. A स्वल्पपला for स्वल्पफला. ABC मृदंग for मृदङ्गः. A कृतवेशनः, C कृतलेपनः for कृतवेधनः.
233. B शृंगां for शृङ्गयां. AC मागधि for मागधी.

तुम्ब्यलाभूः पिण्डफला गोतुम्बी तु नृपात्मजा ।
शारद्यां लाङ्गली तोयपिप्पली शकुलादनिः ॥ 235

गोलोम्यां जटिलोग्रोग्रगन्धा तीक्ष्णा जया वचा ।
वारं तु पिङ्गली वक्त्रं ह्रिबेरं दीर्घरोमकम् ॥

चामरश्चामरं ज्येष्ठं बर्हिष्ठं जटिलं जटी ।
शैलमूलं तु कच्चोरं पलाशो हिमजा शटिः ॥

अर्शोघ्नी मुसली ताली तालमूली खलिन्यपि । 240
खञ्जोऽरिष्टो ग्रहोच्छिष्टो रसोनो गृञ्जनः कटुः ॥

लशुनं दीर्घपत्रश्च पिच्छगन्धो महौषधः ।
वेणौ तु वंशकर्मारौ मृत्युपुष्पस्तृणध्वजः ॥

तृणराजे तलस्तालो महापत्रः फलेरुहः ।
क्रमुको वाटिको घण्टो गुवाङ्कुः क्रूर आसवः ॥ 245

कषायो नागवाक्पूगः फले तस्य तु पर्कटम् ।
तच्छुष्के खरमित्युक्तं चिक्कणं चक्कणं मतम् ॥

दीर्घवृन्ते रामपूगो लतापूगे तु योजनः ।
भूपूगे तु लघूकः स्यात्क्षुद्रो भोधः कटुः खिलः ॥

---

234. ABC गोतुंवि for गोतुम्बी.
235. C शारंद्या for शारद्यां, A लांगलि, B ळांगलि for लाङ्गली. B °पिप्पलि for °पिप्पली. ABC शकुलादनि for शकुलादनिः.
236. ABC तुटिलो° for जटिलो°. ABC जाया for जया.
237. ABC पिंगळी for पिङ्गली. B वावेरं for ह्रिवेरं.
238. A चामरं श्यामरं, B चामरश्यामरं, C चमरश्चमरं for चामरश्चामरं. BC बर्हिष्टं for वर्हिष्ठं. AC जंटा for जटी.
239. AB शटि, C शठि for शटिः.
240. ABC अशोघ्नं for अर्शोघ्नं. AC मुसलि for मुसली. A तालि for ताली. ABC लालमूलि for तालमूली, ABC वलिन्यपि for खलिन्यपि.
241. AB खंजू for खञ्जो. C अरिष्टा for अरिष्टो. ABC ग्रहोछिष्टा, C ग्रहोभिष्टा for ग्रहोच्छिष्टो. A ग्रंजन, BC ग्रंजनः for गृञ्जनः. AB कदुः for कटुः.
242. A दीर्घ × द्रश्च for दीर्घपत्रश्च. ABC पछगंधो for पिच्छगन्धो.
243. ABC वंशकर्मोका for वंशकर्मारौ. AB त्वणध्वजः, C त्यणाघ्वजः for तृणध्वजः.
244. C स्थूलो for तालो.
245. ABC गुवांगु for गुवाङ्कुः. ABC क्रूरः for क्रूरः.
247. C तत्पुष्पे for तच्छुष्के. ABC चिक्कण for चिक्कणं.
248. ABC दीर्घवंते for दीर्घवृन्ते.
249. B लघूःकः for लघूकः. ABC स्या for स्यात्. B कलः, C खलः for खिलः.

250 हिन्तालस्तृणराजश्च नारिकेले तु लाङ्गली ।
दाक्षिणात्योऽफले बालः सुतङ्गः कृच्छ्रकेसरः ॥

खर्जूरे तु मधुक्षीरस्तस्मिन्खर्जूरिकाल्पके ।
केतक्यां गुप्तरागः स्याद्रजःपुष्पौ वलीनकः ॥

ताल्यां दृढदला ताली पत्रताली वराङ्गना ।
255 इक्षुः पुष्यो मधुतृणः खड्गपत्रो महारसः ॥

मुञ्जस्तु मुञ्जको मेध्ये मृदुत्वग् ब्रह्ममेखलः ।
[उल्लूकस्तूलपो] दर्भमूर्ध्वमूलं खरच्छदः ॥

दूर्वा सहस्रवीर्या तु शतवीर्या तु सा सिता ।
शष्पं बालतृणं शादः सर्वं तु तृणमर्जुनम् ॥

260 सिंहः सुगन्धिः पारीन्द्रः शार्दूलः श्वेतपिङ्गलः ।
कण्ठीरवो महानादो हरिः शार्दूलविक्रमः ॥

शार्दूलो हिंसरुश्चन्द्रश्चन्द्रकी दृङ्मृगादनः ।
पिण्डारकस्तु चित्राङ्गो महादंष्ट्रो वरोटकः ॥

---

250. ABC हिंताळः for हिंतालः. AB नारिकेळे, C नाळिकेरे for नारिकेले. ABC लाङ्गलि for लाङ्गली.

252. AB खजूरिकाके, C खजूरिकाल्पके (?) for खर्जूरिकाल्पके.

253. ABC केतक्यों for केतक्यां. ABC गप्तरागः for गुप्तरागः. AB रजपुष्पो, C वज्रपुष्पो for रजःपुष्पो. AB वलिनकः for वलीनकः.

254. ABC ताळ्यां for ताल्यां. B दृढदळा for दृढदला. ABC ताळी पत्रताळि for ताली पत्रताली.

255. C इक्षु for इक्षुः. AB पुष्या, C पुषा (?) for पुष्यो.

256. ABC मंजः for मुञ्जः. A मु × यो, B मुञ्जयो, C मुञ्जीयो for मुञ्जको. AC मेद्ध्रे, B मध्ये for मेध्ये. A मृदुत्वद्, B मृदुतद् for मृदुत्वग्. A ब्रंहमेघलः, BC ब्रह्ममेघलः for ब्रह्ममेखलः.

257. A दर्वं for दर्भं. A ऊध्वमूर्ध्वं, B ऊध्वमूबिं for ऊर्ध्वमूलं. A खरछदः, B बिरछदः, C खरः छदः for खरच्छदः.

258. A सहस्र × र्या, B सहस्रपर्या for सहस्रवीर्या. B श्शतवीर्या for शतवीर्या.

259. A बालतृणां, B बालःतृणं for बालतृणं. ABC स्सर्वं for सर्वं.

260. A सिंहस्तु × धिः, B सिंहस्यगंधिः, C सुहस्सुगंधि for सिंहः सुगंधिः. AC परिंद्र, B पारीन्द्रो for पारीन्द्रः. A ष्या × ×, B शार्णू ×, C व्याशर्ण for शार्दूलः. ABC श्वेतपिंगळः for श्वेतपिङ्गलः.

261. A कर्णि × ×, B कर्णा × ×, C कणि × × for कण्ठीरवो.

262. ABC हिंसरुक्चंन्द्रो° for हिंसरुश्चन्द्र°. BC चंद्रकि for चन्द्रकी. ABC दृङ्मृगादनः for दृङ्मृगादनः.

घोणी जलप्रियो वज्रदंष्ट्रो वाराहको हरिः ।
कामरूपी स्तब्धरोमा पीनस्कन्धस्तलेक्षणः ॥ 265

दीर्घरोमा च भल्लूको विकरालोऽच्छभल्लुकः ।
महिषः सैरिभोऽश्वारिर्जरन्तो गद्गदस्वनः ॥

हेरम्बः कृष्णशृङ्गश्च तुलायः कासरो गुरुः ।
कृष्णः स्यात्कृष्णसारे तु निरञ्जननिरञ्जकौ ॥

यज्ञार्हः शम्बरः स्वल्पे पृषदस्तु स विन्दुमान् । 270
महो रुरुः कृष्णसार एणको विपुलोन्नतः ॥

पोटरूपो गदाभासो रोहिषो बृहतिर्महान् ।
वातप्रमी गोजवी स्याद्वातायुः शिवविग्रहः ॥

मृदूच्चकरोमयुक्तः प्रियरो मसृणः स्मृतः ।
श्वेतचन्द्रः श्वेतरेखो नीलः स श्वेतनीलकः ॥ 275

बिलेशयः कदलिको मृदू रुक्षश्च कर्बुरः ।
श्यामला श्यामिका श्वेतबिन्दुः स्यात्षोडशायता ॥

---

264. AC घोणि, B घोणे for घोणी. AC वज्रदंष्ट्रा, B वज्रदंष्ट्रा for वज्रदंष्ट्रो. A वारा × को for वाराहको.

265. A कामरूर्प, B कामरूप, C कामरूपि for कामरूपी. A स्त × णम × नसंदोलतेक्षण:, B स्तस्य करो मनस्त्वं दोलतेक्षणः, C स्त × × × मसं दोलतेक्षणः for स्तब्धरोमा पीनस्कन्धस्तलेक्षणः.

266. ABC दीर्घरोमश्च for दीर्घरोमा च. ABC वृकरालो for विकरालो. AB अच्चभल्लुकः for अच्छभल्लुकः.

267. ABC सारिभो for सैरिभो. ABC जळाता for जरन्तो. B °स्वरः for °स्वनः.

269. B स्या for स्यात्. AC °निरंजकाः, B °निरंजका for °निरञ्जकौ.

270. ABC शंभर for शम्बरः. ABC स्वल्पो for स्वल्पे. ABC ष for स.

271. AB महा for महो. A × रुः, B गुरुः, C रुळिः for रुरुः. ABC कृष्णसारः for कृष्णसार. AB पेणवो, C पेगंवो for एणको.

272. AB पाटरूपो for पोटरूपो. AC गदभासो for गदाभासो. ABC रोगिषो for रोहिषो. AC बृहति, B बृहती for बृहतिर् .

273. ABC गोजवि for गोजवी. C न्योद् for स्याद्.

274. ABC मृदूच्चकोरोमयुका for मृदूच्चकरोमयुक्तः. ABC मसृण for मसृणः. AC सृतः for स्मृतः.

275. A श्वेतरेखा, BC श्वेतरेख for श्वेतरेखो. ABC निलः for नीलः. ABC स्स for स. A श्वेसनिलकः, B श्वेसनीलकः, C श्वसनीलकः for श्वेतनीलकः.

276. ABC कदळिको for कदलिको. ABC मृदु for मृदू.

277. ABC श्यामिको for श्यामिका. ABC °बिंदु for °बिन्दुः. A चोदशा × ×, B चोडशामला, C चोडशा मता for षोडशायता.

चतुरा चन्द्रका श्यामा स्निग्धरोमा वनप्रिया ।
कृष्णाथवा गोधूमाभा स्निग्धोच्चमृगरोहिका ॥

280 मृगाद्याः कृष्णसाराद्यास्त एव पशवः स्मृताः ।
अष्टपादो गजारातिः शरभस्तूत्पदो रविः ॥

गोवाही स्याद्वनगवो गवयो वाहवारणः ।
शिबिबः स्याद्गन्धमृगः कस्तूरी मृगवालका ॥

अण्डस्तु तस्याः कस्तूरी राजार्हं शितिचन्दनम् ।
285 मदनी वेधमुख्या तु मार्जारी गन्धवेलिका ॥

श्वभीरुः सृगलो भेरुः क्रोष्टा च मृगमत्तकः ।
मर्कटः स्यान्महावेगः कुरङ्गो भल्लुकः पृथुः ॥

सौरभेयी शृङ्गिणी गौरर्घ्या महिरुषा शुभा ।
तम्पा तम्बा निलिम्पा चोस्रानड्वाहीनिलिम्पिकाः ॥

290 रजःपूता रक्तवर्णा रोहिणी वायुसंभवा ।
शवली प्रक्षराङ्गी च सुमना व्योमसंभवा ॥

---

278. ABC स्निग्धारोमा for स्निग्धरोमा.
279. ABC कृष्णामहाधवागोधू for कृष्णाथवा गोधूमाभा. BC स्निग्धोच्छ° for स्निग्धोच्च°.
280. C मृगादनः for मृगाद्याः. ABC पशव for पशवः.
281. ABC अष्टपाद for अष्टपादो.
282. ABC गोवाहि for गोवाही. ABC स्त्राद् for स्याद्.
283. A शिग्मेगि, B शिखेभ, C शिवेवि for शिबिबः. C स्याड् for स्याद्. ABC कस्तूरि for कस्तूरी.
284. ABC अंदः for अण्डः. AB कस्तूरि, C कसूरि for कस्तूरी. A शीतिचंदनं, C शितिनन्दनं for शितिचन्दनं.
285. ABC मदनि for मदनी. B वेद° for वेध°. ABC मार्जारि for मार्जारी. AB °वेळिका, C °हेळिका for °वेलिका.
286. ABC स्वभीरु for श्वभीरुः. AB श्रगलो, C स्रगलो for सृगलो. AB क्रोष्ठा for क्रोष्टा. A °दंतकः for °मत्तकः.
287. B कुरंग for कुरङ्गो.
288. ABC शृंगिणि for शृङ्गिणी. A स्यारध्यान महिषा मभा, B स्यारर्घ्या महिमुषामभा, C गौरर्घ्या महि × शुभा for गौरर्घ्या महिरुषा शुभा.
289. AC °ळलीलंपिछद्रो°, B °ललीलंपिछद्रो° for °निलिम्पा चोस्रा°. AB ° × द्वाहि, C °तड्वाहि for °नड्वाहि°. A °लंविकाः, B °लंबिके, C °लंबिकेकाँः for निलिम्पिकाः.
290. B रोहिणि for रोहिणी. B °संभवं for °संभवाः.
291. ABC शवलि for शवली. A समभा, BC समना for सुमना. A व्याम्य°, C प्येम° for व्योम°.

वराङ्गा तु चतुर्वर्षा द्विवर्षा तु द्विहायनी ।
एकवर्षा तु सा धन्या बहुक्षीरा तु वञ्चुला ॥

नैचकी गौर्गृहश्रेष्ठा भद्रा गौर्गोमतल्लिका ।
काल्योपसर्या प्रजनी पलिक्नी बालगर्भिणी ॥ 295

चिरसूता बष्कयणी वशा वन्ध्या वृषस्वसा ।
दुःखदोह्या तु वरटा सुखदोह्या तु सुव्रता ॥

धेनुर्नवप्रसूतिर्गौर्बहुसूतिः परेष्टुका ।
अभिवन्यान्यवत्सा गौर्वृषाक्रान्ता तु सन्धिनी ॥

आपीनमूधो वृन्तस्तु स्तनो वत्सस्तु तर्णकः । 300
उक्षा गौर्वृषलोऽनड्वान्वाह्यः स्कन्धवहो वशी ॥

शाक्वरो बाडबेयश्च वर्षभेयश्च वर्धकः ।
ककुदी गोवृषो घोषः ककुद्मान्वृषभो वृषः ॥

षण्डस्तु गोपतिः श्रीमान् स कर्मचर ईश्वरः ।
कण्ठः कण्ठविहीनः स्यात्षण्डस्तु छिन्नपुच्छकः ॥ 305

---

292. A तं for तु. AB द्विपोयनी, C द्विपायनि for द्विहायनी.

293. A एकवमा for एकवर्षा. AC वंन्चुळा, B वंजुळा for वञ्चुला.

294. A नैचगि for नैचकी. A गे गृहश्रेष्ठा, C गौर्गृहश्रेष्ठा for गौर्गृहश्रेष्ठा. A × द्रा for भद्रा. C गोर् for गौर्. AB गोमतल्लि, C गौमतल्लिका for गोमतल्लिका.

295. A × ल्योपसर्या for काल्योपसर्या. C प्रजनि for प्रजनी. A पलि ×, B हळि ×, C ह × × for पलिक्नी. AC × लगर्भिणी, B × लगर्भिणि for वालगर्भिणी.

296. A भष्कयेणि, B बष्कयणि for बष्कयणी. ABC वृषास्वसा for वृषस्वसा.

297. B वरती for वरटा. A सुखदूह्य, C सुखदोहा for सुखदोह्या.

298. A नवप्रसूति, B नामप्रसत, C × ×-प्रसूतिर् for नवप्रसूतिर्. A गान् for गौर्. A ब × सूतिः, C बहुसूति for बहुसूतिः. A परेष्टका, BC परेष्टका for परेष्टुका.

299. A अभिवना × × त्सा, BC अभिवन्या-× वत्सा for अभिवन्यान्यवत्सा. ABC गोर् for गौर्. ABC वृषाक्रा × (?) for वृषाक्रान्ता. ABC संधिनि for सन्धिनी.

300. AB ऊढो for ऊधो.

301. A पेक्षा for उक्षा. A गार् for गौर्. ABC वृषमो for वृषलो. BC अनद्वान् for अनड्वान्. ABC वाह्य for वाह्यः. AC स्कंदवहो for स्कन्धवहो. C वशि for वशी.

302. A शावरो, BC शार्वरो for शाक्वरो. A भाडबेयः, C बादबेय for बाडबेयः.

303. AC ककुदि, B ककुलि for ककुदी. ABC कोवृषो for गोवृषो.

304. BC करी° for कर्म°.

305. ABC कंठविहीन for कण्ठविहीनः. ABC °पुछकः for °पुच्छकः.

गोमान्गोमी च गोस्वामी गोविन्दोऽधिकृतो गवाम् ।
नैचकी गोशिरोदेशः सास्ना तु गलकम्बलः ॥

गोशकृद्गोमयोऽप्यस्त्री गोग्रन्थिः शुष्कगोमयः ।
करिषं दोहलं हव्यं नकुलं गोधनं समे ॥

310 गोमहिष्यादिकं जीवधनं स्यात्पादबन्धनम् ।
आरङ्गं लम्बकर्णश्च तच्छगस्तबकः पशुः ॥

छगी मञ्जी सर्वभक्षा चुलुम्बा च गलस्तनी ।
जटिलस्तु वनच्छागो बालविन्द्यो निरादनः ॥

एडकोऽप्युरणो मीथ उरभ्रो रोमजोऽप्यविः ।
315 खररासभचक्रीवद्वाहवाहकगर्दभाः ॥

ईषस्वरो धूम्रकण्ठो नैकभारसहः शलः ।
चिरमेषी गर्दनकः कोलिण्टो बडवापतिः ॥

करभश्च मयस्तूष्ट्रो महाग्रीवस्तु वर्तकः ।
भषकः सारमेयः स्याच्छ्वा शुनो मृगदंशकः ॥

---

306. A गोनो for गोमी. ABC गोस्वामि for गोस्वामी. AB गोविंदे, C गोविंधे for गोविन्दो. ABC × × कृतो for अधिकृतो.

307. AC नैचकि for नैचकी. ABC गळकंबळः for गलकम्बलः.

308. AB °दोमयो for °द्गोमयो. A अस्त्रि for अस्त्री.

309. A गोहळं, BC दोहळं for दोहलं. AC हत्यं for हव्यं. ABC णकुलं for नकुलं.

310. ABC °दनं for °धनं. A पादबंधनंः for पादबन्धनं.

311. B आरंबो for आरङ्गो. BC तच गो for तच्छग°.

312. A सर्वभक्षोप्यस्य लुंबा च, B सर्वभक्षोप्य- × लुबाज, C सर्वभक्षाप्युलुं हि च for स्याच्चुलुम्बा च. A गळस्तनी, BC गळस्तनि for गलस्तनी.

313. AC जटिकः, B जटिग for जटिलः. ABC वनछागो for वनच्छागो.

314. C एढको for एडको. ABC °प्यरुणे for °प्युरणो. AC मीथः, B मीडः for मीथ. AC पुरभ्रो, B पुरत्रो for उरभ्रो.

315. ABC °चिक्री° for °चक्री°. AC °भावक° for °वाहक°.

316. AB धुम्रकंठो, C दुम्रकंठो for धूम्रकण्ठो. A नैकभारस्सह, B नैकभारस्सहः, C नैकभारसह for नैकभारसहः. A श्यलः for शलः.

317. A चिरमेषिक, BC चिरमेषि for चिरमेषी. AB कोलिठो, C कोलिटो for कोलिण्टो. A बिदवापतिः for बडवापतिः.

318. ABC मयु° for मय°. AB °स्तुष्ट्रो, C °स्तुष्ट्रो for °स्तूष्ट्रो. ABC वर्त्तकः for वर्तकः.

319. AB सारय, C स्यारय for सारमेयः.

रतिकीलो गृहमृगः कुक्कुरः क्रोधनः शुनिः । 320
यक्ष इन्द्रमृगः श्वालः कपिलो मण्डलः सुनः ॥

जिह्वापानः पुरोगामी कृतज्ञो रात्रिजागरः ।
शुनी तु सरमा श्वाली विचरो ग्रामसूकरः ॥

जाहको गात्रसंकोची मण्डली नखरायुधः ।
पशुस्तु सुलको मोकः कुवः शुद्धजडश्चरिः ॥ 325

हिंस्रो व्याघ्रादिको व्यालः श्वापदो मरुलः शिरिः ।
मनुष्या मानवा मर्त्या मनुजा मानुषा नराः ॥

द्विपादो नहुषो गोधा व्राताः पञ्चजना नरः ।
ब्रह्मक्षत्रियविट्शूद्रा इति वर्णचतुष्टये ॥

उपवर्णास्तु संकीर्णा विवर्णास्त्वन्त्यजातयः । 330
एकवर्णाः स्ववर्णाः स्युर्हीनवर्णास्तु जुङ्गिताः ॥

भूदेवो ब्राह्मणो विप्रो मुखजो वेदसंभवः ।
अग्रजन्मा बाडबकः श्रेष्ठवर्णः कराग्निमान् ॥

उपनायस्तूपनय आनायश्च वटूकृतिः ।
ब्रह्मचारी व्रती वर्णी नैष्ठिकस्तु स आश्रमी ॥ 335

---

320. A रतीढा, B रती कीलु, C रती कीलो for रतिकीलो.
321. ABC यक्षो for यक्ष. AB इन्द्रमृग, C इन्द्रमृगे for इन्द्रमृगः. A मंदलः for मण्डलः. AC शुनः, B शुनिः for सुनः.
323. C श्वालि for श्वाली. C लिचरो for विचरो.
324. AB जागूको for जाहको. A जाग्रसंकोची, B जाग्रसंकोचि, C जाग्रसंकोजि for गात्रसंकोची. ABC मंडलि for मण्डली. A नधरायुधः, B नघुरायुधः, C नघुरायुधः for नखरायुधः.
325. AC म्रोकः for मोकः. A कुवश्शुधोजडश्चारिः, B कुवश्शो दोजडश्चारिः, C कुपशुः दोजडश्चारि for कुवः शुद्धजडश्चरिः.
326. ABC हिंसो for हिंस्रो. ABC व्याळ for व्यालः. ABC मरुळः for मरुलः.
328. ABC मातः for व्राताः.
329. AB ब्रह्मश्च क्षत्रियविटचूद्र, C ब्रह्मक्षत्रियविटचूद्र for ब्रह्मक्षत्रियविट्शूद्रा.
330. B असवर्णाः for उपवर्णाः. ABC संकीर्णाः for संकीर्णा. AB विवणा° for विवर्णा°. ABC °स्त्यंत्यजातयः for °स्त्वन्त्यजातयः.
331. AB स्ववर्णा, C स्यवर्णा for स्ववर्णाः. ABC स्यु for स्युर् . B बान° for हीन°.
332. AB ब्रांह्मणो, C ब्रांह्मणे for ब्राह्मणो.
333. C बाडबकं for बाडबकः. B श्रेष्ठवर्ण for श्रेष्ठवर्णः.
335. BC ब्रह्मचारि for ब्रह्मचारी. AC व्रति for व्रती. A वर्णा, C वणि for वर्णी. ABC आक्रमी for आश्रमी.

गायत्रस्तूपकुर्वाणो वैदिकोऽधीतवेदकः।
निःस्वाध्यायो निराकृतिर्वैवाही गृहमेधिकः॥

उच्छिष्टभोजनो देवनिवेद्यबलिभोजनः।
जातिमात्रोपजीवस्तु यः स स्याद्ब्राह्मणब्रुवः॥

340 अजपस्त्वसदध्येता देवाजीवस्तु देवलः।
आघायवो वातरता विगीताः ख्यातगर्हणाः॥

अवगीताश्च हन्ता तु गुरूणां नरकीलकः।
शश्विदानो दुराचारो निषिद्धैकरुचिः खरुः॥

त्यक्तात्मा त्यक्तसंवासोऽवकीर्णी तु क्षतव्रतः।
345 शाखारण्डोऽन्यशाखास्थो वर्णिलिङ्ग्यादयस्त्रिषु॥

अग्नीन्धनं त्वग्निकार्यं चाग्निध्री चाग्निकारिका।
ग्रासे तु पवनी भिक्षा पुष्कलं तच्चतुष्टयम्॥

ते चत्वारो हन्तकारो हन्तकारद्वयं घनम्।
मुष्टयष्टकोऽव्ययं किंचित्पुष्कलं तु तदष्टके॥

---

336. ABC अधित° for अधीत°.

337. AC निस्वाध्यायो, C निस्याध्यायो for निःस्वाध्यायो. ABC निराकृत्तिः for निराकृतिर्. ABC वैवाहि for वैवाही. B ग्रह° for गृह°.

338. A उच्चिष्टभोजनो, B उच्चिष्ठभोमिनो, C उछिष्ठभोजनो for उच्छिष्टभोजनो. A °पिविभोजनः, B बलिभोजिनः for बलिभोजनः

339. A यस्य स्वात्, B यस्या स्यात्, C यस्य स्यात् for यः स स्याद्. AC ब्रांह्णब्रवः, B ब्रांह्णब्रुवः for ब्राह्मणब्रुवः.

340. AB असदत्येता, C असदद्येता for असदध्येता. A देव° for देवा°.

341. A आमायवो for आघायवो. A विगिताः, B विगिता, C लिङ्गिता for विगीताः. ABC ख्यातगर्हणः for ख्यातगर्हणाः

342. ABC गुरूणान्नरकीलकः for गुरूणां नरकीलकः.

343 AB शिरुः, C शरुः for खरुः.

344. AB त्यक्तेसंवासा, C त्यक्तसंवाद for त्यक्तसंवासो. A अवकीर्ण, BC अवकीर्णि. for अवकीर्णी.

345. A शारवारंदो for शाखारण्डो. B °शाखास्तो for °शाखास्थो. ABC °लिंगा° for लिंग्या°.

346. A (before corr.) अग्निदन, A (after corr.) अग्नित्व, B अग्निधनं, C अग्निदनं for अग्नीन्धनं. AC अग्निकार्यं, for त्वग्निकार्यं. ABC चाग्निध्रि for चाग्निध्री. A °कार्मका, B °कानिका for °कारिका.

347. A पयनि, BC पपनि for पवनी. AB भिक्षाः for भिक्षा. A तच्चभिक्षाचरः. B तच्छतुष्टयं, C तचतुष्टयं for तच्चतुष्टयं.

पुष्कलानि तु चत्वारि पूर्णपात्रकमास्त्रियाम् । 350
भिक्षाचरः कौकिटिकः कटिको [भि]क्षुकः पुमान् ॥

द्विजायिनी ब्रह्मसूत्रं सूत्रं यज्ञोपवीतिकम् ।
पवित्रं चोपवीतं तूपोद्धृते दक्षिणे भुजे ॥

प्राचीनावीतमन्यस्मिन्निवीतं कण्ठलम्बितम् ।
